क्र.नं. 92

2450

# भगवद्‌गीता

ग्रं १८०४

३४/२९

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

॥अथभगवद्गीताप्रारंभः॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

भ०गी
१

॥श्रीगणेशायनमः॥श्रीकाशीविश्वेश्वरायनमः॥ॐ॥
अस्यश्रीभगवद्गीतामालामंत्रस्यभगवान्वेदव्यासऋ
षिः॥श्रीकृष्णपरमात्मादेवता॥अशोच्यानन्वशोचस्त्वं
प्रज्ञावादांश्चभाषसेइतिबीजं॥सर्वधर्मान्परित्यज्यमा
मेकंशरणंव्रजेतिशक्तिः॥अहंत्वासर्वपापेभ्योमोक्ष
इष्यामिमाशुच॥इतिकीलकं॥नैनंछिंदंतिशस्त्राणि
नैनंदहतिपावकः॥इतिअंगुष्ठाभ्यांनमः॥नचैनंक्लेदयं
त्यापोनशोषइतिमारुतः॥इतितर्जनीभ्यांनमः॥अ
छेद्योयमदाह्योयमक्लेद्योशोष्यएवच॥इतिमध्यमांन राम
मः॥नित्यंसर्वगतःस्थाणूरचलोयंसनातनः॥इति १

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2A)

अनामिकाभ्यांनमः॥पश्यमेपार्थरूपाणिशतशोथस
हस्रशः॥इतिकनिष्ठिकाभ्यांनमः॥नानाविधानिदिव्या
निनानावर्णाकृतीनिच॥इतिकरतळकरपृष्ठाभ्यांनमः
नैनंछिंदंतिशस्त्राणिनैनंदहतिपावकः॥इतिहृदया
यनमः॥नचैनंक्लेदयंत्यापोनशोषयतिमारुतः॥इति
शिरसेस्वाहा॥अछेद्योयमदाह्योयमक्लेद्योशोष्यऽ
एवच॥इतिशिखायैवोषट्॥नित्यःसर्वगतःस्था
णुरचलोयंसनातनं॥इतिकवचायहुं॥पश्यमेपा
र्थरूपाणिशतशोथसहस्रशः॥इतिनेत्रत्रयायवष
ट्॥नानाविधानिदिव्यानिनानावर्णाकृतीनिच॥इति

(3) नमोस्तुतेव्यासविशालबुद्धेफुल्लारविंदायतपत्रनेत्रे॥येनत्वयाभा
रततैलपूर्णःप्रज्वालितोज्ञानमयप्रदीपः॥

भ०गी० अस्त्रायफट्॥श्रीकृष्णप्रीत्यर्थंजपेविनियोगः॥अथध्यानं॥
॥२॥ पार्थायप्रतिबोधितांभगवतानारायणेनस्वयं॥व्यासे
नग्रथितांपुराणमुनिनामध्येमहाभारते॥अद्वैतामृत
वर्षिणींभगवतीमष्टादशाध्यायिनीं॥अंबत्वामनुसं
दधामिभगवद्गीतेभवद्वेषिणीं॥१॥प्रपन्नपारिजाता
यतोत्रवेत्रैकपाणये॥ज्ञानमुद्रायकृष्णायगीतामृत
दुहेनमः॥२॥सर्वोपनिषदोगावोदोग्धागोपालनंदनः॥
पार्थोवत्सःसुधीर्भोक्तादुग्धंगीतामृतंमहत्॥३॥भी
ष्मद्रोणतटाजयद्रथजलागांधारनीलोत्पलाशल्य ॥राम॥
ग्राहवतीकृपेणवहिताकर्णेनवेलाकुला॥अश्वत्था ॥२॥
वसुदेवसुतंदेवंकंसचाणूरमर्दनं॥देवकीपरमानंदंकृष्णंवंदे
जगद्गुरुं॥

पाराशर्यवचःसरोजममलंगीतार्थगंधोत्कटं॥नानाख्यानककेसरंहरिकथा
संबोधनाबोधितंलोकेसज्जनषट्पदैरहरहःपेपीयमानंमुदाभूयाद्भारतपंकजंक
लिमलप्रध्वंसिनःश्रेयसे॥मूकंकरोतिवाचालंपंगुंलंघयतेगिरिं॥यत्कृपातमहंवंदे
माधवंपरमानंदमाधवं॥यंब्रह्मावरुणेंद्ररुद्रमरुतःस्तुन्वंतिदि
व्यैःस्तवैर्वेदैःसांगपदक्रमोपनिषदैर्गायंतियंसामगाः
ध्यानावस्थिततद्गतेनमनसापश्यंतियंयोगिनो
यस्यांतंनविदुःसुरासुरगणादेवायतस्मैनमः॥
भीष्मद्रोणतटाजयद्रथजलागांधारनीलोत्पला शल्यग्राहवतीकृपेणवहनीकर्णेनवेलाकुला॥
अश्वत्थामविकर्णघोरमकरादुर्योधनावर्तिनीसोत्तीर्णाखलुपांडवै
रणनदीकैवर्तकःकेशवः॥गीतागीतेतियोवक्तिह्यक्षरंहि
सदानरः॥सर्वपापंक्षयंयातिविष्णुलोकंसगच्छति॥भातिसर्वेषुवेदेषुरतिःसर्वत्रजंतुषु॥तरणंसर्वपापानांतस्माद्भार
तमुच्यते॥भारतस्यसमुद्रस्यमंथनान्नारायणस्यच॥अ
प्रमेयाणिचत्वारिपुण्यंतोयंगुणाःगुणः॥धृतराष्ट्रउवाच॥
धर्मक्षेत्रेकुरुक्षेत्रेसमवेतायुयुत्सवः॥मामकाःपांडवाश्चै
वकिमकुर्वतसंजय॥१॥संजयउवाच॥दृष्ट्वातुपांडवा
नीकंव्यूढंदुर्योधनस्तदा॥आचार्यमुपसंगम्यराजाव
चनमब्रवीत॥पश्यैतांपांडुपुत्राणामाचार्यमहतींचमूं॥२

(५)

भ०गी० व्यूढांद्रुपदपुत्रेणतवशिष्येणधीमता ॥३॥ अत्रशूरामहे
॥३॥ ष्वासाभीमार्जुनसमायुधि ॥ युयुधानोविराटश्चद्रुपदश्चमे
हारथः ॥४॥ धृष्टकेतुश्चेकितानःकाशिराजश्चवीर्यवा
न् ॥ पुरुजित्कुंतिभोजश्चशैब्यश्चरपुंगवः ॥ युधामन्युश्च न
विक्रांतउत्तमौजाश्चवीर्यवान् ॥ सौभद्रोद्रौपदेयाश्चस
र्वएवमहारथाः ॥६॥ अस्माकंतुविशिष्टायतान्निबोधद्वि
जोत्तम ॥ नायकाममसैन्यस्यसंज्ञार्थंतान्ब्रवीमिते ॥७॥
भवान्भीष्मश्चकर्णश्चकृपश्चसमितिंजयः ॥ अश्वत्थामा
विकर्णश्चसोमदत्तिस्तथैवच ॥८॥ अन्येचबहवःशूरा ॥रामू॥
मदर्थेत्यक्तजीविताः ॥ नानाशस्त्रप्रहरणाःसर्वेयुद्धवि ॥३॥

Joint property of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

पर्याप्तंत्विदमेतेषांबलंभीमाभिरक्षितं॥

(5A)

शारदाः॥९॥अपर्याप्तंतदस्माकंबलंभीष्माभिरक्षितं॥
॥१०॥आयनेषुचसर्वेषुयथाभागमवस्थिताः॥भीष्म
मेवाभिरक्षंतुभवंतःसर्वएवहि॥११॥संजयउवाच॥
तस्यसंजयन्हर्षंकुरुवृद्धःपितामहः॥सिंहनादंविनद्यो
च्चैःशंखंदध्मौप्रतापवान्॥१२॥ततःशंखाश्चभेर्यश्च
पणवानकगोमुखाः॥सहसैवाभ्यहन्यंतसशब्दस्तु
मुलोभवत्॥१३॥ततःश्वेतैर्हयैर्युक्तेमहतिस्यंदनेस्थि
तौ॥माधवःपांडवश्चैवदिव्यौशंखौप्रदध्मतुः॥१४॥ ६८
पांचजन्यंहृषीकेशोदेवदत्तंधनंजयः॥पौंड्रंदध्मौमहा
शंखंभीमकर्मावृकोदरः॥१५॥अनंतविजयंराजा

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai "

(5)

भ० गी० कुंतीपुत्रोयुधिष्ठिरः॥ नकुलःसहदेवश्चसुघोषमणिपुष्प
॥४॥ कौ॥१६॥ काश्यश्चपरमेष्वासः शिखंडीचमहारथः॥ धृष्ट
द्युम्नोविराटश्चसात्यकिश्चापराजितः॥१७॥ द्रुपदोद्रौपदे
याश्चसर्वशः पृथिवीपते॥ सौभद्रश्चमहाबाहुः शंखान्दध्मुः
पृथक्पृथक्॥१८॥ सघोषोधार्तराष्ट्राणांहृदयानि
व्यदारयत्॥ नभश्चपृथिवींचैवतुमुलोव्यनुनादयन्॥१९॥
अथव्यवस्थितान्दृष्ट्वाधार्तराष्ट्रान्कपिध्वजः॥ प्रवृत्तेश
स्त्रसंपातेधनुरुद्यम्यपांडवः॥२०॥ हृषीकेशंतदावाक्य
मिदमाहमहीपते॥ अर्जुनउवाच॥ सेनयोरुभयोर्मध्ये ॥राम॥
रथंस्थापयमेच्युत॥२१॥ यावदेतान्निरीक्ष्येहंयोद्धुकामा ॥४॥

(5A)

मनवस्थितान्॥कैर्मयासहयोद्धव्यमस्मिन्रणसमुद्यमे॥२२॥
योत्स्यमानानवेक्षेहंयएतेत्रसमागताः॥धार्तराष्ट्रस्यदु
र्बुद्धेर्युद्धेप्रियचिकीर्षवः॥२३॥संजयउवाच॥एवमुक्तोहृषी
केशोगुडाकेशेनभारत॥सेनयोरुभयोर्मध्येस्थापयित्वा
रथोत्तमं॥२४॥भीष्मद्रोणप्रमुखतःसर्वेषांचमहीक्षितां॥
म६ उवाचपार्थपश्यैतान्समवेतान्कुरूनिति॥२५॥तत्रापश्यत्स्थि
तान्पार्थःपितॄनथपितामहान्॥आचार्यान्मातुलान्भ्रातॄ
न्पुत्रान्पौत्रान्सखींस्तथा॥२६॥श्वशुरान्सुहृदश्चैवसे
नयोरुभयोरपि॥तान्समीक्ष्यसकौंतेयःसर्वान्बंधूनव
स्थितान्॥२७॥कृपयापरयाविष्टोविषीदन्निदमब्रवीत्॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

भा०गी० ॥अर्जुनउवाच॥दृष्ट्वेमंस्वजनंकृष्णयुयुत्सुंसमुपस्थितं॥
८ ॥२८॥सीदंतिममगात्राणिमुखंचपरिशुष्यति॥वेपथुश्चश
रीरेमेरोमहर्षश्चजायते॥२९॥गांडीवंस्रंसतेहस्तात्त्वक्चैव
परिदह्यते॥नचशक्नोम्यवस्थातुंभ्रमतीवचमेमनः॥३०॥
निमित्तानिचपश्यामिविपरीतानिकेशव॥नचश्रेयोनुपश्या
मिहत्वास्वजनमाहवे॥३१॥नकांक्षेविजयंकृष्णनचराज्यं
सुखानिच॥किंनोराज्येनगोविंदकिंभोगैर्जीवितेनवा॥
३२॥येषामर्थेकांक्षितंनोराज्यंभोगाःसुखानिच॥तइ
मेवस्थितायुद्धेप्राणांस्त्यक्त्वाधनानिच॥३३॥आचार्याः राम
पितरःपुत्रास्तथैवचपितामहाः॥मातुलाःश्वशुराःपौत्राः ५

(6A)

श्यालाः संबंधिनस्तथा ॥३४॥ एतांनहंतुमिच्छामिघ्न
तोपिमधुसूदन ॥ अपित्रैलोक्यराज्यस्यहेतोः किंनुमही
कृते ॥३५॥ निहत्यधार्त्तराष्ट्रान्नः काप्रीतिस्याज्जनार्द
न ॥ पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥३६॥ त
स्मान्नार्हावयंहंतुंधार्त्तराष्ट्रान्सबांधवान् ॥ स्वजनंहिकथं
हत्वासुखिनःस्याममाधव ॥३७॥ यद्यप्येतेनपश्यंति
लोभोपहतचेतसः ॥ कुलक्षयकृतंदोषंमित्रद्रोहेचपात
कं ॥३८॥ कथंनज्ञेयमस्माभिःपापादस्मान्निवर्त्तितुं ॥
कुलक्षयकृतंदोषंप्रपश्यद्भिर्जनार्दन ॥३९॥ कुलक्षयेप्र
णश्यंतिकुलधर्माःसनातनाः ॥ धर्मेनष्टेकुलंकृत्स्नम

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(०३)

भ०गी ॥६॥

धर्मोभिभवत्युत॥४०॥ अधर्माभिभवात्कृष्णप्रदुष्यंतिकु
लस्त्रियः॥ स्त्रिषुदुष्टासुवार्ष्णेयजायतेवर्णसंकरः॥४१॥
संकरोनरकायैवकुलघ्नानांकुलस्यच॥ पतंतिपितरोह्येषां
लुप्तपिंडोदकक्रियाः॥४२॥ दोषैरेतैःकुलघ्नानांवर्णसंकर
कारकैः॥ उत्साद्यंतेजातिधर्माःकुलधर्माश्चशाश्वताः॥४३॥
उत्सन्नकुलधर्माणांमनुष्याणांजनार्दन॥ नरकेनियतं
वासोभवतीत्यनुशुश्रुम॥४४॥ अहोबतमहत्पापंक
र्तुंव्यवसितावयं॥ यद्राज्यसुखलोभेनहंतुंस्वजनमुद्य
ताः॥४५॥ यदिमामप्रतीकारमशस्त्रंशस्त्रपाणयः॥ धार्त
राष्ट्रारणेहन्युस्तन्मेक्षेमतरंभवेत्॥४६॥ संजयउवाच॥ ॥६॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(7A)

एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत्॥ विसृज्य स
शरं चापं शोकसंविग्नमानसः॥ ४७॥ हरिः ॐ तत्सदि
ति श्रीमन्महाभारते शतसहस्रसंहितायां वैयासिक्यां भी
ष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोगो ना
म प्रथमोऽध्यायः॥ श्रीसांबार्पणमस्तु॥ ॥ ॥ संजय
उवाच॥ तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणं॥ विषी
दंतमिदं वाक्यमुवाच मधुसूदनः॥ १॥ श्रीभगवानुवाच॥
कुतस्त्वा कश्मलमिदं विषमे समुपस्थितं॥ अनार्यजुष्ट
मस्वर्ग्यमकीर्त्तिकरमर्जुन॥ २॥ क्लैब्यं मास्म गमः पार्थ

Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

 नैतत्वय्युपपद्यते॥क्षुद्रंहृदयदौर्बल्यंत्यक्त्वोत्तिष्ठपरंतप॥३॥
 अर्जुनउवाच॥कथंभीष्ममहंसंख्येद्रोणंचमधुसूदन॥इ
षुभिःप्रतियोत्स्यामिपूजार्हावरिसूदन॥४॥गुरूनहत्वा
हिमहानुभावाञ्छ्रेयोभोक्तुंभैक्षमपीहलोकेहत्वार्थकामां
स्तुगुरूनिहैवभुंजीयभोगान्रुधिरप्रदिग्धान्॥५॥न
चैतद्विद्मःकतरन्नोगरीयोयद्वाजयेमयदिवानोजयेयुः॥
यानेवहत्वानजिजीविषामस्तेवस्थिताःप्रमुखेधार्त्तरा
ष्ट्राः॥६॥कार्पण्यदोषोपहतस्वभावःपृच्छामित्वांधर्मसं
मूढचेताः॥यच्छ्रेयस्यान्निश्चितंब्रूहितन्मेशिष्यस्तेहंशा 
धिमांत्वांप्रपन्नं॥७॥नहिप्रपश्यामिममापनुद्याद्यच्छो 

(8A)

क्मुछोषणमिंद्रियाणां॥ अवाप्यभूमावसपत्नमृद्धंराज्यं
सुराणामपिचाधिपत्यं॥८॥ संजयउवाच॥ एवमुक्त्वाहृषी
केशंगुडाकेशः परंतप॥ नयोत्स्यइतिगोविंदमुक्त्वातूष्णींबि
भूवह॥९॥ तमुवाचहृषीकेशः प्रहसन्निवभारत॥ सेनयो
रुभयोर्मध्येविषीदंतमिदंवचः॥१०॥ श्रीभगवानुवाच॥
अशोच्यानन्वशोचस्त्वंप्रज्ञावादांश्चभाषसे॥ गतासून
गतासूंश्चनानुशोचंतिपंडिताः॥११॥ नत्वेवाहंजातुनासं
नत्वंनेमेजनाधिपाः॥ नचैवनभविष्यामः सर्वेवयमतः
परं॥१२॥ देहिनोस्मिन्यथादेहेकौमारंयौवनंजरा॥ तथादे
हांतरप्राप्तिर्धीरस्तत्रनमुह्यति॥१३॥ मात्रास्पर्शास्तुकौं
तेयशीतोष्णसुखदुःखदाः॥ आगमापायिनोनित्या

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan Pratishthan, Mumbai.

भ०गी स्तांस्तितीक्षस्वभारत॥१४॥यंहिनव्यथयंत्येतेपुरुषंपु
॥८॥ रुषर्षभ॥समदुःखसुखंधीरंसोमृतत्वायकल्पते॥
॥१५॥नासतोविद्यतेभावोनाभावोविद्यतेसतः॥उभ
योरपिदृष्टोंतस्त्वनयोस्तत्त्वदर्शिभिः॥१६॥अवि
तु५ नाशितुतद्विद्धियेनसर्वमिदंततं॥विनाशमव्ययस्या
स्यनकश्चित्कर्तुमर्हति॥१७॥अंतवंतइमेदेहानित्य
स्योक्ताःशरीरिणः॥अनाशिनोप्रमेयस्यतस्मा
द्युध्यस्वभारत॥१८॥यएनंवेत्तिहंतारंयश्चैनंमन्य
तेहतं॥उभौतौनविजानीतोनायंहंतिनहन्यते॥१९॥ राम
नजायतेम्रियतेवाकदाचिन्नायंभूत्वाभविताबा ॥८॥

Joint project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(9A)

नभूयः॥अजोनित्यःशाश्वतोयंपुराणोनहन्यतेहन्यमाने
शरीरे॥२०॥वेदाविनाशिनंनित्यंयएनमजमव्ययं॥कथं
सःपुरुषःपार्थकंघातयतिहंतिकं॥२१॥वासांसिजीर्णानि
यथाविहायनवानिगृह्णातिनरोपराणि॥तथाशरीरा
णिविहायजीर्णान्यन्यानिसंयातिनवानिदेही॥२२॥नै
नंछिंदंतिशस्त्राणिनैनंदहतिपावकः॥नचैनंक्लेदयं
त्यापोनशोषयतिमारुतः॥२३॥अच्छेद्योयमदाह्योयम
क्लेद्योशोष्यएवच॥नित्यःसर्वगतःस्थाणुरचलोयंसनात
नः॥२४॥अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते॥
तस्मादेवंविदित्वैनंनानुशोचितुमर्हसि॥२५॥अथचै

"A project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

भ०गी० नंनित्यजातं नित्यंवामन्यसेमृतं ॥ तथापित्वंमहाबाहोने
॥९॥ वंशोचितुमर्हसि ॥ २६ ॥ जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृ
तस्यच ॥ तस्मादपरिहार्येर्थेनत्वंशोचितुमर्हसि ॥ २७ ॥ अ
व्यक्तादीनिभूतानिव्यक्तमध्यानिभारत ॥ अव्यक्तनिधना
न्येवतत्रकापरिदेवना ॥ २८ ॥ आश्चर्यवत्पश्यतिकश्चिदेन
माश्चर्यवद्वदतितथैवचान्यः ॥ आश्चर्यवच्चैनमन्यःशृणो
तिश्रुत्वाप्येनंवेदनचैवकश्चित् ॥ २९ ॥ देहीनित्यमवध्यो
यंदेहेसर्वस्यभारत ॥ तस्मात्सर्वाणिभूतानिनत्वंशोचि
तुमर्हसि ॥ ३० ॥ स्वधर्ममपिचावेक्ष्यनविकंपितुमर्हसि ॥ राम
धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यते ॥ ३१ ॥ महछ ॥९॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(10A)

याचोपपन्नंस्वर्गद्वारमपावृतं॥सुखिनःक्षत्रियाःपार्थ
लभंतेयुद्धमीदृशं॥३२॥अथचेत्त्वमिमंधर्म्यंसंग्रामंनक
रिष्यसि॥ततःस्वधर्मंकीर्तिंचहत्वापापमवाप्स्यसि
॥३३॥अकीर्तिंचापिभूतानिकथयिष्यंतितेव्ययां॥
संभावितस्यचाकीर्तिर्मरणादतिरिच्यते॥३४॥भया
द्रणादुपरतंमंस्यंतेत्वांमहारथाः॥येषांचत्वंबहुमतोभू
त्वायास्यसिलाघवं॥३५॥अवाच्यवादांश्चबहून्व
दिष्यंतितवाहिताः॥निंदंतस्तवसामर्थ्यंततोदुःखतरं
नुकिं॥३६॥हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसे
महीं॥तस्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयः॥३७॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com